# गुरुकुल-पत्रिका

मार्गशीर्ष मासः २०२४
नवम्बर-दिसम्बर १९६७
पूर्णांक २३२

प्रकाशक
श्री धर्मपालो विद्यालंकारः
म० मुख्याधिष्ठाता
गुरुकुल कांगडी विश्वविद्यालयस्य

सम्पादक --श्री भगवद्दत्तो वेदालंकारः
उपसम्पादक --श्री प्रो० बुद्धदेव एम ए.

ओ३म्

# गुरुकुल-पत्रिका

[ गुरुकुल कांगड़ी विश्वविद्यालयस्य मासिक पत्रिका ]

मार्गशीर्ष २०२४, नवम्बर-दिसम्बर १९६७, वर्षम् २०, अङ्कः ४, पूर्णाङ्कः २३२

## श्रुति-सुधा

( ऋषिः—मेध्यातिथिः काण्वः । देवता—सविता । छन्दः—गायत्री )

ओ३म् अपां नपातमवसे सवितारमुपस्तुहि ।
तस्य व्रतान्युश्मसि ॥

( ऋ. १।२२।६ )

( अपां नपातं ) जलों को न गिरने देने वाले उस ( सवितारं ) सविता देव को, हे स्तोता ( अवसे ) अपनी रक्षा के लिये ( उपस्तुहि ) तू स्तुति कर, हम ( तस्य ) उसके ( व्रतानि ) व्रतों व नियमों को ( उश्मसि ) चाहते हैं ।

यहां आपः शब्द रेतस् के लिए आया है । रेतस् को न गिरने देकर ऊर्ध्वरेतस् बनाना सविता का काम है । ऊर्ध्वरेतस् पुरुष ही द्युलोक की ओर ऊर्ध्वारोहण कर सकता है । यही रेतस् गायत्री व श्येन बन कर सोमाहरण के लिये द्युलोक की ओर उड़ान भरता है । इस उड़ान में रक्षा करना सविता का काम है । मनुष्य का अधःपतन रेतस् के पतन से ही होता है । अतः अपने आपस्तत्त्व को न गिरने देने के लिये सविता देव से प्रार्थना करनी चाहिये । इसका उपाय यह है कि जो भी सविता देव के व्रत व नियम है उनका ठीक-ठीक पालन होना चाहिए ।

[ अक्टूबर-नवम्बर ६७ से आगे ]

# श्रीचैतन्यनीतिशतकम्

'श्री चैतन्यः'

बलिनं दुर्जनं दृष्ट्वा,
भेदनीतिं समाश्रयेत् ।
सबलै रिपुभि: सार्धं,
स्वशत्रुं योधयेत्सदा ॥१६४॥

बलवन्तं रिपुं दृष्ट्वा,
युद्धोद्घोषं न कारयेत् ।
मित्रवदाचरेन्नित्यं,
प्राप्तकालं प्रतीक्षयेत ॥१६५॥

प्राप्ते काले सुधीर्नूनं
शत्रुनाशं समाचरेत् ।
काले कर्मकरो लोके,
न पराभवमश्नुते ॥१६६॥

प्रबलै रिपुभिः सार्धं,
यो नरो योद्धमिच्छति ।
स नूनं निधनं याति,
मिथ्यागर्वेण पूरित ॥१६७॥

मिथ्यागर्वो मनुष्याणां,
मूर्खताचरण स्मृतम् ।
राजानो बहवः शूरा,
मिथ्यागर्वेण नाशिताः ॥१६८॥

स्कन्धमारोपयेच्छत्रु,
प्रबल निर्बलो जनः ।
दासभावं समाश्रित्य,
स्वात्मान रक्षयेद् बुधः ॥१६९॥

अशक्तस्तु यदा पश्ये-
दात्मानं सर्वसाधनैः ।
साधुभावं समाश्रित्य,
ह्यात्मानं रक्षयेत्सदा ॥१७०॥

स्वपक्ष निर्बलं दृष्ट्वा,
सन्धि कुर्युविपश्चितः ।
अशक्तो युद्धकारी तु,
स्वात्मघाती नरो मतः ॥१७१॥

स्वात्मरक्षा विहीनेन,
किंचित्कर्त्तुं न शक्यते ।
येन केन प्रकारेण,
कर्त्तव्यमात्मरक्षणम् ॥१७२॥

त्यजेन्मानापमानं च,
ह्यात्मरक्षारतो जन. ।
सर्वाणि लघुकृत्यानि,
कुर्वन्नपि न संकुचेत् ॥१७३॥

आत्मानं सततं रक्षेद्,
दूरदर्शी च पण्डितः ।
चिकीर्षुर्गुरुकर्माणि,
लोकसेवापरायण ॥१७४॥

भेदयेच्छत्रुमित्राणि,
साम्ना दानैर्भयेन वा ।
एकाकिनं रिपुं वीक्ष्य,
तस्य गर्वं विचूर्णयेत् ॥१७५॥

शत्रुपक्षस्य दुर्नीतिं,
जिज्ञासुः सर्वदा भवेत् ।
गुप्तैश्चारैः समायुक्तो,
शत्रुमन्वेशयेत्सदा ॥१७६॥

शत्रुविश्वासयुक्तस्तु,
महामूर्खो हि मानवः ।
नाश्यते स खलैर्नूनं,
दुष्टविश्वासकारकः ॥१७७॥

दुष्टाय तु क्षमादानं,
नूनं पुण्यविघातकम् ।
सर्पाय चैव दुष्टाय,
क्षमाभावो विनाशकः ॥१७८॥

खलस्तु कूटनीतिं हि,
प्रयुङ्क्ते ननु सर्वदा ।
तस्मात्तु नीतिनिष्णात,
आत्मानं रक्षयेद् बुधः ॥१७९॥

नीतिविद्याविहीनस्तु,
सामान्यः सरलो जनः ।
सर्वदा लुण्ठ्यते दुष्टै,
विश्वासान्नात्र संशयः ॥१८०॥

कूटनीतिप्रयोगं तु,
करोतु मध्यमो जनः ।
अधमात्पुरुषान्नून-
मेष रक्षति सर्वदा ॥१८१॥

विपद्ग्रस्तो नरो नूनं,
कुर्याद् वै धैर्यधारणम् ।
धैर्यधर्माश्रियेणैव,
सन्तरेद् दुःखसागरम् ॥१८२॥

धैर्यहीनो नरो नित्यं,
सम्प्राप्नोत्यधमां गतिम् ।
दुःखं सवर्धते नूनं,
न प्राप्नोति सुखाश्रयम् ॥१८३॥

सम्पत्तौ मृदुलो भाव,
विपत्तौ कर्कशो महान् ।
दृश्यते हि सतां पुंसां,
हर्षशोकविनिस्पृहाम् ॥१८४॥

विपद् भाजां हि धीराणां,
धैर्यध्वंसो न जायते ।
क्रीडन्ति धैर्यमाश्रित्य,
धीरा घोरविपत्तिभिः ॥१८५॥

येन केन प्रकारेण,
कर्त्तव्यो मित्र संग्रहः ।
जनशक्तिप्रयोगेण,
शत्रुं विध्वंसयेत्सदा ॥१८६॥

दण्डनीतिप्रयोगाय,
स्वशक्तिं परिवर्धयेत् ।
धनशक्तिसुसम्पन्नः,
शस्त्रं संवर्धयेत्सदा ॥१८७॥

जागरूकः सदा भूत्वा,
शत्रुपक्षं विनाशयेत् ।
सर्वाणि शत्रुकृत्यानि,
जानन् गुप्तचरैर्युतः ॥१८८॥

न कदाचित् प्रयुञ्जीत,
दण्डं स्वार्थस्य साधने ।
स्वार्थभावप्रयुक्तोऽयं,
जायते पातकं महत् ॥१८९॥

हिंसकाय दयाभाव,
यो नरः कर्त्तुमिच्छति ।
स नूनं निधनं याति,
पृथ्वीराजो नृपो यथा ॥१९०॥

पृथ्वीराजेन स्व शत्रु,
गोरिणं हिंसकं प्रति ।
क्षमादानं कृतं येन,
श्वसमं भूपतिर्मृत ॥१९१॥

राजसिंहो महाशूरो,
दुर्गादासो महाव्रतः ।
गुरुर्गोविन्दसिंहश्च,
शिवाजी च महारथ ॥१९२॥

चत्वारश्चतुरा शूराः,
सिंहवद् गर्जनप्रियाः ।
एकेन यवनेनैव,
नीतिज्ञेन सुमर्दिताः ॥१९३॥

घोषयेद् घोरसंग्रामं,
पापकर्मरतैः सह ।
युद्धं च धार्मिकं ज्ञेयं,
देवदानवयुद्धवत् ॥१९४॥

पापस्य आथ पुण्यस्य,
युद्धं भवति सर्वदा ।
सर्वकाले सुसन्नद्धः,
पापपक्षं विनाशयेत् ॥१९५॥

सत्यपक्षंसमाश्रित्य,
युद्धं कुर्यान्नरो भुवि ।
पापपक्षविनाशाय,
सन्नद्धः सर्वदा भवेत् ॥१९६॥

येन केनाप्युपायेन,
साफल्यं भजते नरः ।
निःशङ्को निर्भयो भूत्वा,
तां नीतिमवलम्बयेत् ॥१९७॥

सामदानभयेनापि,
युद्धेनापि तथैव च ।
येन केन प्रकारेण,
कर्त्तव्यं पापनाशनम् ॥१९८॥

सत्यासत्यप्रयोगेण,
पापपक्षं विनाशयेत् ।
पापपक्षविनाशाय,
सर्वकृत्यानि धर्मवत् ॥१९९॥

असत्यभाषणं पापं,
पापसाधनकाम्यया ।
लोककल्याणभावेन,
यदुक्तं सत्यमेव तत् ॥२००॥

सदसन्निर्णये लग्नः,
धर्मयुद्धे रतो जनः ।
नूनं पञ्चत्वमाप्नोति,
धर्माधर्मविवेचनात् ॥२०१॥

अविवेकी वृथा गर्वी,
धर्मभीरुश्च मानवः ।
अनीतिज्ञो नरो नूनं,
सम्प्राप्नोति पराभवम् ॥२०२॥

परस्त्रीधनहारी च,
दयापात्रं न विद्यते ।
निर्दयाय दयाभावः,
पापकर्म हि कथ्यते ॥२०३॥

धर्मं प्रोक्तो दयाभाव,
सत्यमेतन्न सशयः ।
दुष्टाय दण्डनीतिस्तु,
दयाभावो हि कथ्यते ॥२०४॥

प्रयुक्त पापनाशाय,
दण्ड धर्मं विदुर्बुधाः ।
नास्मिन् पापभयं किंचिद्,
धर्मकृत्यमिद स्मृतम् ॥२०५॥

वृथा सम्भाषणं नित्यं,
नूनं कलहकारणम् ।
मिथ्यातर्ककृतर्केण,
कटुता जायते सदा ॥२०६॥

हृदय कटुकं कृत्वा,
गोष्ठीं गच्छति दुर्जनः ।
शरवत् कटुवचनेन,
भेदयन् सज्जनान् वृथा ॥२०७॥

सर्पवद् दुर्जनस्त्याज्यो,
मणिना भूषितोऽपि सन् ।
कदाचित् कुपितो दुष्टो,
विषदन्तेन दंशयेत् ॥२०८॥

धनिकोऽपि सुरूपोऽपि,
दुराचाररतो नरः ।
दुरुक्तो दूरतो नश्य,
स्त्याज्यो भवति दुर्जनः ॥२०९॥

दुर्जनस्य हि संसर्गाद्,
नरो यात्यधमां गतिम् ।
गलितं फलमेकैकं,
दूषयेदखिलान्यपि ॥२१०॥

दुर्जनः सज्जनं पूर्वं,
पोषयन्निव दृश्यते ।
लोभपाशे दृढं बद्ध्वा,
सतः शोषयते सदा ॥२११॥

दुर्जनान्न प्रहीतव्य,
उपहारः कियानपि ।
द्विगुणं त्रिगुणं वापि,
गृह्णाति दुर्जनः पुनः ॥२१२॥

गृहीतो दुष्टचक्रे तु,
शीघ्रं नैव विमुच्यते ।
आत्मानं धननाशं वा,
प्राप्नोति लुठितो नरः ॥२१३॥

अत्रापि वञ्चकाः सन्ति,
तत्रापीत्यवधारयन् ।
सर्वकाले सुसन्नद्ध,
आत्मानं रक्षयेद् बुधः ॥२१४॥

क्रूरकर्मरते लोके,
सन्नद्धः सर्वसाधनैः ।
दृढप्रतिज्ञो नीतिज्ञ,
आत्मसंरक्षणे क्षमः ॥२१५॥

निर्बलो बहुभाषी च,
खलसन्तोषणे रतः ।
आत्मधिक्कारयुक्तोऽपि,
नरो नूनं विनश्यति ॥२१६॥

आक्रान्तं दुर्जनैर्नूनं,
दृश्यते विकलं जगत् ।
नीतिशक्तिसुधर्मेण,
विश्वं रक्षेन्नरोत्तमः ॥२१७॥

विश्वनाशभयं तावत्,
सुस्पष्टमणुशस्त्रकैः ।
जीवनं मरणं वाऽपि,
सूक्ष्मसूत्रेण संयुतम् ॥२१८॥

विश्वनाशेन को लाभः,
कस्य वा नैव तर्क्यते ।
तथापि विश्वनाशाय,
धावते त्वरितं नरः ॥२१९॥

शान्तिनीतिं समाश्रित्य,
मृदुलां भयहारिणीम् ।
मधुरां शीतलां स्निग्धां,
विश्वं रक्षेन्नरोत्तमः ॥२२०॥

हृदिकृत्वा दयाभावं,
दण्डनीतिं समाश्रयेत्,
गलिताङ्गे रुजाक्रान्ते,
यथा शल्यचिकित्सकः ॥२२१॥

धर्मनीतिं महात्मानो,
न मुञ्चन्ति कदाचन ।
लोकोत्तरा नरा एते,
अहिंसाव्रतदीक्षिताः ॥२२२॥

खलाय हिंसकायैव,
राक्षसायाथवाऽपि च ।
साधुभावेन वर्त्तन्ते,
अहिंसाव्रतदीक्षिताः ॥२२३॥

परविश्वासयुक्ता वै,
सज्जनाः प्रेमपूरिताः ।
जयन्ति दुर्जनान् सर्वान्,
स्नेहशक्तिसमन्विताः ॥२२४

कुर्वन्तः पापचित्तानां,
स्नेहेन परिवर्तनम् ।
धर्मं प्रख्यापयन्तीह,
त्वहिंसाव्रतदीक्षिताः ॥२२५॥

पापिन पुण्यदानेन,
सत्येनानृतवादिनम् ।
हिंसकं स्नेहभावेन,
जयन्ति साधवो जनाः ॥२२६॥

साधुभाव समाश्रित्य,
त्यक्त्वा कुटिलमार्गणम् ।
स्नेहमार्गेण गच्छन्ति,
त्वहिंसाव्रतदीक्षिताः ॥२२७॥

प्राणिसेवारता नित्यं,
मिथ्याभयविवर्जिताः ।
रागद्वेषविहीनास्ते,
त्वहिंसाव्रतदीक्षिताः ॥२२८॥

सुखेषु चैव दुःखेषु,
समभावं समागताः ।
वीतरागभयक्रोधा,
अहिंसाव्रतदीक्षिताः ॥२२९॥

स्नेहपुष्पं करे धृत्वा,
शोभनं च सुगन्धितम् ।
हरन्ति पापदुर्गन्ध-
महिंसाव्रतदीक्षिता. ॥२३०॥

क्रुध्यन्तं मृदुवाक्येन,
सामृतेन हितैषिणः ।
शमयन्ति सुविश्वस्ता,
अहिंसाव्रतदीक्षिताः ॥२३१॥

ब्रुवन्ति सर्वदा सत्यं,
नाप्रियं प्रियदर्शनः ।
हृष्टं मिष्टं मनोहारि,
त्वहिंसाव्रतदीक्षिताः ॥२३२॥

सत्कामकर्मयोगेन,
सुतप्तास्तापसा इमे ।
साक्षाद् धर्माश्रिता एते,
त्वहिंसाव्रतदीक्षिता· ॥२३३॥

जये पराजये वाऽपि,,
हर्षशोकविवर्जिताः ।
निष्कामकर्मसंयुक्ता,
अहिंसाव्रतदीक्षिताः ॥२३४॥

हृदि कृत्वा दयाभावं,
प्राणिसेवापरायणाः ।
परोपकारं कुर्वन्ति,
त्वहिंसाव्रतदीक्षिताः ॥२३५॥

नरे वा कुञ्जरे वापि,
सर्वदा समदर्शिनः ।
दुर्लभा देवतातुल्या,
अहिंसाव्रतदीक्षिताः ॥२३६॥

परोपकार पीयूषं,
हृदि कृत्वा निरन्तरम् ।
यतन्ते पापनाशाय,
त्वहिंसाव्रतदीक्षिता. ॥२३७॥

पीडितं दुःखितं दृष्ट्वा,
भयचिन्तासमाकुलम् ।
दयार्द्रचित्ता धावन्ति,
त्वहिंसाव्रतदीक्षिताः ॥२३८॥

शान्तिसंरक्षणे नित्यं,
धर्मसंस्थापनेऽपि च ।
परोपकारसंलग्ना,
अहिंसाव्रतदीक्षिता ॥२३९॥

(क्रमशः)

★★★

# शालिकालः ( ऋतुश्रृङ्गारात् )

श्री प्रो० बुद्धदेव शर्मा, एम०ए० वेदाचार्यः 'संस्कृतविभाग' गुरुकुल कांगड़ी विश्वविद्यालयः

दीर्घेष्वतीतेषु हि दुर्दिनेषु
प्रवासी गृहं गन्तुमनाः परन्तु ।
हिमालयाली रजताभ्रमाला
दिशान्तशुभ्रेव रुणद्धि मार्गम् ।।१।।

शरत्समीरः पिहितान् कपाटान्
प्रवासिचित्तं युगपच्च हन्ति ।
कारं करालं पतितस्य तस्य
पुनश्च तस्यां हरतीव निद्राम् ।।२।।

शरद्यद्य बन्धूकगन्धानुबन्धा-
दयं गन्धवाहः सुमन्दं प्रवाति ।
अवस्पन्दितं धारयत्याकुलोऽय-
ममन्द कथं किन्तु चित्तं प्रवासी ।।३।।

इदानीं विभिन्नेव कादम्बिनीय-
मदभ्राभ्रशुभ्रेषु चीरोपमेषु ।
प्रसन्नस्वभाग्यद्युनक्षत्रमालां
प्रवासी पठन् नूनमास्ते निशायाम् ।।४।।

नरीनृत्यमानास्तरङ्गास्तटिन्या
मिथः पङ्क्तिबद्धाः सरण्यां धरण्याः ।
अदूरे प्रतीरे च जेगीयमाने
कथं रोदितीति प्रवासी न जाने ।।५।।

अनिर्वर्ण्यतारुण्यलावण्यरम्यां
शरत्फुल्लशोणप्रसूनैर्लसन्ती ।
ध्रुवं गन्धवाहस्य संपर्ककम्पा
समुज्जातलज्जेव शेफालिकालिः ।।६।।

प्रभातरक्ताविवृतैः प्रवासी
स्वलोचनाभ्यां शतपत्रपात्रैः ।
अहो समोदं मकरन्दवृन्दं
भृङ्गाङ्गनाभिः पिबतीव साकम् ।।७।।

प्रफुल्लकल्हारविहारिहारि-
मरालमालां दिवसान्तशान्ताम् ।
वीक्ष्य प्रवासी स्मरति स्वबन्धो-
र्विविक्तदेशो हि विषादकारी ।।८।।

नायं शशाङ्को नवकुप्यकुम्भो
दुग्धौघधाराकिरणेषु यस्य ।
प्राज्यं शरत्पार्विकपूर्णिमायां
स्नातीव वल्यः पवनस्य सङ्गात् ॥६॥

शरन्मनोजाब्जमनोज्ञदिग्ध
शराकुला मञ्जुमृणालमाला ।
पाण्डूदकाभा शतपत्रशय्या
वापीयमाभाति वियोगिनीव ॥१०॥

अधित्यकोत्पन्नविशालशालि-
राशिं समालोक्य कृषिवला वै ।
नूनं न मन्यन्त इमे सुमेरु-
मकिञ्चना.काञ्चनधान्यधन्याः ॥११॥

पिकाः स्वगीतं जलदा निनादं
नृत्यं मयूराः परिहाय शान्ताः ।
यावत् प्रवासी लभते निवृत्तिं
तावत् स हंसस्वनभीलुकोऽयम् ॥१२

मन्ये ललाटंतपरश्मयोऽद्य
शरत्तुषारातिकठोरपाणौ ।
वशंगतास्तीव्रतरास्त एव
हिरण्यरम्याः शमयन्ति शैत्यम् ॥१३॥

बालप्रवालैः मुकुलैश्च लीला
परस्परोपात्तपयःसुयन्त्रैः ।
अनेकवर्णद्रवरूपशोभै
वितन्यते दिक्ष्विव होलिकायाम् ॥१४॥

स्थालीव पिष्टातकभारनम्रा
सरोवरे कोकनदाकृतिर्वै ।
नीले स्थिराम्भोमणिकुट्टिमेऽयं
तस्या विकीर्णारुणिमा विभाति ॥१५॥

घनाञ्जनागामलमालिकेयं
वर्षर्तुधौता धवलीभवन्ती ।
गृह्णात्यसौ कुप्यसुनव्यरूपं
न दानदीना हि जनाः स्वकान्त्या ॥१६॥

( क्रमशः )

—०—

(अक्टूबर-नवम्बर ६७ से आगे)

# मम संस्कृतोत्कर्षवृत्तान्तः

श्री विश्नाथ केशव छत्रे, जोगेलकरवाडा, सिद्धेश्वर आल, कल्याण ( जि० ठाणें)

### २० भारतीयनररत्नमालाग्रथनारंभः योक्तव्यापद् विवेकेन स्वहिताय प्रयत्नतः ।

१९४९ तमे ख्रिस्ताब्दे कापि मयि आपतिता महती कौटुम्बिकी आपत्तिः मम उपकारकारिणी खलु बभूव । तां विस्मर्तुं मनः सदैव सद्विचारे नियोजयामि । लब्धः प्रत्येकः क्षण. सत्कार्ये, श्रवणे, लेखने वा वाचने, उपयोजयामि । अस्मात् पूर्वाभ्यासात् ईशकृपया, क्षयनिर्मुक्तेन, लब्धपुनर्जन्मना इव मया सोत्साहं प्रारब्धा भारतीय-नररत्नमालायाः रचना । कस्यापि लोकोत्तरपुरुषस्य गुणकार्यविशेष. एकस्मिन्नेव श्लोके ग्रथितव्यः इति संकल्प्य मासद्वये षष्ठिसप्ततिश्लोका. मया विरचिताः । मार्गेण चलता, विद्युद्रथेन प्रवसता, उद्याने, देवालये, भिवंडी सेतौ वा विश्राम्यता, किं बहुना, कर्तनालये क्रियमाणे नापितकर्मणि अपि श्लोकरचना प्रयत्नतः मया क्रियेत । अवलोक्यताम् तावत् आद्यः श्लोकः—श्रीरामः—

'भार्या रूपवती सती च सदनं सीता नवोढागता
शीर्षार्थं यतते स्म राजमुकुटः स्कंधं समारुह्य च ।
पित्राज्ञापरिपालनार्थमखिलं त्यक्त्वा तु तद्वैभवं
योऽरण्यं निरगात् प्रसन्नमनसा धन्यः स रामः प्रभुः।।'

समये द्वित्रिदिनान्यपि मया यापितानि श्लोकमात्रस्य उत्कृष्टत्वं साधयितुम् ।

### २१ श्रीगानुमहाशयानां गुणरागित्वम्

रुग्णः जन्मत एव' इति स्वेनैव वर्णितः अयं जनः वारं-वारं प्रकृतेः अस्वास्थ्यात् कार्यविरामं हठात् अनुभवति । अथैकदा ईदृशे अस्वास्थ्ये संस्कृतगद्ये साधुवर्यं दामाजिगुणविशेषकथनात्मकः लेखः मया लिखितः । श्लोकेन सार्धं सः 'भवितव्यम्' प्रति प्रेषितः, सद्यः एव प्रकाशितः इति दृष्ट्वा प्रोत्साहितेन मया, ईदृशीं लेखमालां लिखितुं संकल्प्य, द्वित्रिलेखाः प्रेषिताः 'प्राक्कथनेन' सार्धम् । भवितव्यम्—संपादकैः श्री. स. प. गानुमहाशयैःमालायाः क्रमशः प्रकाशनं सत्वरम् एव अनुमतम्, आरब्धं च विना विलम्बम् । एवं, सेवाकार्यं कुर्वतापि मया विशंतिलेखाः लिखिताः ते च प्रकाशिताः संपादकैः । परं सेवाकार्यस्य भारेण सत्वरं लिखितुं मम शक्तिः अवसरश्च अपर्याप्तौ इति प्रतीते, मया एव तथा विज्ञापिताः संपादकाः माला च खंडिता बभूव । तथापि पूर्वम् अपरिचितानां श्रीगानुमहाशयानां, विदुषामपि गुणरागित्वं सौहार्दं च मयि दृढम् आत्मविश्वासम् अजनयेतां, यद् गीर्वाणभाषायां कमपि विदितम् आशयं गद्ये वा पद्ये प्रकटयितुं शक्नोमि इति ।

अपेते सहसैकस्मिन् लब्धोऽन्यो द्राक् सुहृन्मया ।
देव एवं सदा दक्षो भक्तकृच्छ्रनिवारणे ।।४।।

लोकमान्यजन्मशताब्दिनिमित्तं तैः मत्तः अर्थितः लेखः, दिवानक्तं परिश्रम्य मया लिखितः, प्रेषितश्च नियुक्तसमये इति नूनं भगवत्याः श्रीशारदायाः कृपैव । 'वीरगाथध्वनिः' नाम्ना लेखेन नासिकनिवासिनः तद्बंधोः डा. श्री गायधनो

महाभागानां–दृढः परिचयः संवृत्तः । तैः श्री के. र. काशीकरमहोदयानां–पुरुषार्थ मासिकस्य कार्य-कारिसंपादकानां–बंधुभावः मयि निर्मितः, प्रायेण स्तुत्वा मम अनुराग देवभाषायां लेखनसामर्थ्यं च । नचिरात् श्रीगानुमहाशयाः 'भवितव्यं' संपादकत्वं त्यक्त्वा निर्गताः । तेषां तदर्थं पत्रं प्राप्य परम विषादम् अगच्छम् । महाराष्ट्र-संस्कृत-साहित्यसमेलने (मोहमयी अधिवेशने जून १९५६) उपस्थिताः ते मद्गृहम् आगत्य, आतिथ्यं स्वीकृतवंतः सस्नेहम् । सुखसंलापे तैः कथितं मे स्वयमेव, यत् 'भवल्लेखन प्रकांडपंडितानां लेखनस्य अपेक्षया सुवाच्यतरं निर्दोषतरं च अनुभूत मयेति' । ततः एकदा मम 'कालिदास प्रतिभा' कविताम् अवलोक्य तैः अभिप्रेतम्–'साहित्यिकानाम् अग्रेसरः भवान् भविष्यति इति मे प्रतिभाति ।' अयम् अभिप्रायः तदा सुहृत्-सदिच्छात्वेन स्वीकृत मया अकल्पितरीत्या बह्वंशेन सत्यत्वे परिणतः दृश्यते इदानीम् इति श्रीगानुमहाशयानां यथार्थदूरदर्शित्वनिदर्शकम् । हंत ! न तेषां पुनः दर्शनं साक्षात् वा पत्ररूपेणापि । अधोवर्णित-समशील–सहप्रवासिसदृशाः ते मम स्मृतौ चिरं तिष्ठंति ।

लब्ध्वा प्रवासे समशीलपांथं
सद्यो दृढः स्नेह उदेति तस्मिन् ।
कालेन स स्वेन पथा प्रयाति
स्मृतौ चिर तिष्ठति कश्चनैक. ।।५।।

## २२. कै. पं. क्षमादेवीकाव्यप्रभावः

'केसरी' पत्रस्य सुचिर–नियतवाचकोऽहं नवप्रकाशितग्रंथविषयकम् अभिप्रायं सदैव सौत्सुक्यं विशेषप्रीत्या च सर्वप्रथममेव अवलोकयामि । तेन कै. पंडिता श्री क्षमादेव्याः नाम तस्याः काव्यग्रंथैः सह मे परिचितम् आसीत् । तस्याः निधनवार्ता वृत्तपत्रात् सहसा ज्ञात्वा परमं विषादं गतोऽहम् । नचिरात् 'भवितव्य'-पत्रे प्रकाशिताम् तद्विषयिणीं काव्यस्पर्धाम् प्रविविक्षुणा मया श्लोकषट्कं अल्पज्ञातवृत्तादेव विरच्य प्रेषितं 'भवितव्यं'-पत्रं प्रति, तथैव तस्याः सुकन्या श्री लीला (राव) दयाल-महाभागां प्रति । कालेन तस्याः अधोलिखितं अभिप्राय गीर्वाणभाषायामेव वाशिंग्टननगरत प्रहिते पत्रे पठित्वा, अतीव मुदितोऽभवम् । (तस्याः पतिः कै. श्री हरेश्वर दयाल, तत्र भारतीय–राजदूतत्वेन कार्यं कुर्वन्नासीत् ) । "क्षमास्तवमवलोक्य अत्यंतं प्रसन्नास्मि । पौनःपौन्येन गीतिरूपेण पठ्यते काव्यं एतत् प्रीत्या चास्वाद्यते तत्रस, अनवरतं (मातृ) शोकाग्निना दग्धास्म्यहं परं भवद्गुंफित सुललितपद्यमाला नितान्तम् आह्लादयति मे स्वान्तः । शिखरिणीवृत्तं अतिप्रियं मे । अहो ! अभिनंदनीयं खलु एतच्छंदानि–कौशल्यम् !

## २३ प्राप्तं द्वितीयं पारितोषिकम्

ततः प्रीता सा विंशितरुप्यकाणां देयादेशं (चेक) संपादकं प्रति प्रेष्य, तद्धनं मां प्रति प्रेषयितुं, मन्नाम च पारितोषिक–विजेता इति पत्रे प्रकाशयितुं सा आदिशत् । परं न तद्धनं मया लब्धं संपादकात् वा मन्नामपि तथा प्रकाशितं दृष्टं पत्रे । अनंतरं मुंबापुरीं सा आगता माम् स्वसदनम् आहूय, स्वमातुः लेखनस्थानं संदर्श्य, सुखसंवादं च गीर्वाणभाषायाम् एव कृत्वा, मह्यं न केवलं स्वमातुः प्रकाशितान् सर्वान् ग्रंथान् पारितोषिकार्थं समर्पितवती, परं 'क्षमादेवीस्तव'–कविताथं उपरिनिर्दिष्टान् विंशतिरूप्यकानपि । ततः प्रभृति

श्रीलीलादेव्या मया च यथाकालं यथोचित कारण च अन्योन्ययो कुशल वृत्तविशेषेण सपत्रद्वारा पृच्छ्यते। मातु स्मरणार्थं सा 'दिव्यज्योति (सिमला) मासिक-पत्रिकायाः विशेषांक, स्वद्रव्यं व्ययीकृत्य संपादकेन प्राकाशयत्। तदर्थं प क्षमादेवी विषयिणीं नवकाव्यरचनां मया कारयित्वा 'क्षमादेवीस्तव.' नाम्न्या पूर्वोक्तकविताया सार्धं तस्मिन् सादर समावेशयामास ।

## २४ दीपात् प्रज्वाल्यते दीपः

मम प्रथम प्रकाशिता. संस्कृतकाव्यग्रथ:-सुभाष चरितम् तु कै० पं क्षमादेवी–काव्यावलोकनेन अंतः समुदितया स्फूर्त्या एव विरचितः इति कृतज्ञतया मया 'सुभाषचरितजन्मकथायाम्' उल्लिखितम्। श्री लीलादेवीं प्रति उपायनार्थं तत्पुस्तकं प्रेषितं मया। तत. प्रीतया तया, नचिरात् मातृस्मरणार्थं रुप्यकशतं पारितोषिकत्वेन मह्य प्रहितम्। पं. क्षमादेव्याः तुकाराम-रामदास–ज्ञानेश्वर चरितेभ्य: लब्धप्रेरणया मया सहस्राधिकश्लोकात्मकम् 'श्री एकनाथ चरितम्'–नाथवाङ्मयस्य अंशत: अनुवादेन सह–विरचितम् । तत: 'वृद्धदंपती-विलाप:' भारतवाणीपत्रे २८-२-१९६३ दिनांके, 'भारुंडगीतानुवाद'श्च 'संस्कृत-प्रतिभा'याः मार्च १९६५ अंके प्रकाशितौ। एवं गुरुस्थानभूतायाः पं. क्षमादेव्याः संस्कृतकाव्यबद्धं-चरितं रचयितु मया स्वयं स्फूर्त्या प्रारब्धम् । प्रारंभिकी रचना मया श्री लीलादेवीं प्रति अवलोकनाय प्रेषिता। परं, न जाने कस्मात् कारणात्, किमपि प्रोत्साहनं नाहं लब्धवान्। मम शिष्यरूपेण अधिकारित्वं, काव्यरचनायाः क्षमत्वं, श्री लीलादेव्याः च ग्रंथप्रकाशनविषये सामर्थ्यत्वम् इत्येषु दुर्लभत्रयेषु संगतेष्वपि पं. क्षमादेवीचरितम् न निर्मितम् इति भगवदिच्छा एव प्रतीयते। तथापि मातुः काव्यानि नाट्यरूपे विरच्य, प्रत्यब्दं तस्या. जन्मदिने, निर्याणदिने च काठमांडुनगरे सुरभारतीप्रेमिकाभिः सखीभिः सार्धं, सादर स्वयं नाटयंतीं, गीर्वाणवाण्यामेव अधिकाधिक वाग्व्यवहारं पत्रव्यवहार च सादरं कुर्वंतीं एनां–सुकन्यां विलोक्य पं. क्षमादेवी कवितांते सकौतुकं मया पृष्टम्—

'का नाम धन्या ? दुहितोत माता ?'

दुर्दैववशात् पत्यौ करालकालेन सहसा कवलिते, गजेन्द्रेण उन्मूलितप्रक्षिप्तकमलिनीव वराकी सा श्रीमत्यपि विलुप्तप्रभा, प्रायेण अनपत्यत्वात् संसारविरक्ता कुत्रापि अज्ञातस्थले कालं कथमपि यापयति इति ज्ञायते !

## २५ डॉ. श्रीखंडेकृतं मार्गदर्शनम्

'सुश्लोक कुमार'–'सुश्लोक–मेध'–प्रभृतिग्रंथैः संस्कृत-काव्यानां मराठीसमश्लोकानुवादकरणे ख्यातनाम्नां डा० श्रीखंडे महाभागानां परिचय. 'वाङ्मय श्री खंड'-द्वारा मया आदौ लब्धः दृढस्नेहे परिणत: तेषां दर्शनेन, यदाहं कोल्हापुरदेवीदर्शनार्थं तत्र गतवान्। 'नंदिनीवरप्रदान'स्य मया कृतोऽनुवाद: तेषां प्रीतये अभूत्। पुरणपोलिका सम मिष्टान्नभोजनोत्तरं सद्य एव आतपे तेषां दर्शनार्थं यदा प्रस्थितः अहं, तदा माम् अनुगामिनी चि. सुभा विस्मिता अभूत्। परं न विस्मयकारणमेतत्। यत.—

अनुत्सुकोऽपि कर्याय [illegible] प्रियेण वा ।
बलवद् [illegible] ॥६॥

डा. महाशयैः उपदिष्टोऽहं समग्रवाल्मीकि-रामायणपठनाय। तथा कृतवानहं दिष्ट्या पं.

श्री० सातवलेकरसंपादितान् खंडान् क्रमशः प्राप्य गु० श्री० चोल करमहोदयेभ्यः । ततः मे संस्कृत-भाषाज्ञानं यथा विवृद्धं तथा काव्यशक्तिः अपि । नवनवसंस्कृतकाव्यरचनां डा. महाशयान् प्रति प्रहिणोमि ते च सादरं सकौतुकं च स्वाभिप्रायं प्रकटयंति । आवयोः पत्रव्यवहारः अधिकाधिक. गीर्वाणवाग् द्वारा क्रियते ।

## २६ 'केकावलि'समश्लोकानुवादः

महाराष्ट्रकविशिरोमणिमोरोपंत रचितस्य केकावलि–काव्यस्य मया कृतः समवृत्तानुवादः तैः अवलोक्य प्रशस्तः । भक्तिरसपरिप्लुतस्य अस्य काव्यस्य अनुवादकरणं-षण्मासावधौ–भगवता सह प्रेमकलहकरणनिमित्तेन अनिर्वचनीयं खलु आनंदं मे ददौ । देवभाषायां सटीकम् एतद् यथावसरं लिखितुम् इच्छामि । ततः तद् मराठीतराणां संस्कृतविदां भाविकरसिकानां प्रमोदाय भवेत् इति संशयातीतं मन्मतेन । अत्र उपान्त्यः श्लोकः उद्ध्रियते—

"दयामृत ! घन ! त्वरां कुरु, मयूर आर्तस्तृषा
कटौ विलपदर्भको व्यथितयाम्बयारोप्यते ।
पुनर्नु लभसे कदेदृशमिहातिथिं धार्मिकं
श्रमस्तव न हे हरे ! मम भवार्णवोत्तारणे" ।।

## २७ हितोपदेशानुवादः

१९५४ तमख्रिस्ताब्दस्य आरंभे क्षयस्य प्रथम-प्रहारात् तावन्मुक्तेन मया विश्रांतिकालयापनार्थं मनोविनोदनार्थं च हितोपदेशस्य मराठीभाषायाम् अनुवादकरणं—गद्यस्य गद्ये, पद्यस्य च पद्ये—प्रारब्धम् । 'पद्यस्य पद्ये' (एव)' इतीदृशः अनुवादः अनुपलब्धः प्रतीयते इति विद्वद्वरेभ्यः ज्ञात्वा तु प्रोत्साहितेन मया, मित्रलाभ-सुहृद्भेदनामानौ आद्यभागौ सत्वरं–मासत्रये एव अनूदितौ । तौ प्रेषितौ मया सुपरिचित श्रीखंडे महाभागान् प्रति परीक्षणाय शुद्धीकरणाय च । तैः स्वकार्यव्यापृतैरपि सः अनुवादः मूलेन सह परीक्ष्य, स्थाने स्थाने शुद्धीकृत्य वा दोषान् निर्दिश्य स्वाभिप्रायेण सह प्रतिप्रेषितः । ततः साहित्य अकडमीद्वारा 'मित्रलाभ'-प्रकाशन–प्रयत्ने विफलतां गते, प्रदीर्घकालेन कालानुकूलतां दृष्ट्वा, पुण्यपुरीविद्यापीठात् प्रकाशनार्थम् अनुदानम् अवाप्तुं मया प्रयतितं श्री काकासाहेब गाडगील-महोदय-( कुलगुरु ) द्वारा । सुचिरं विद्यापीठात् उत्तरे अप्राप्ते, नैराश्यं खलु गतोऽहं, विस्मितः एकस्मिन् दिने, हस्तलिखितेन सह चतुःशतरूप्यकाणाम् अनुदानसमतिपत्रं विलोक्य ! तदा कृतज्ञताप्रदर्शनार्थं काकामहाशयान् प्रति प्रहिते पत्रे मया अयं श्लोकः सद्यः विरच्य लिखितः—

'वत्सेनेप्सितमेकदा प्रकटितं संस्मृत्य माता यथा
तं विस्मापयति प्रदाय सहसा संमोदमाना स्वयम् ।
भक्तं वा भगवान् भवानपि तथा मां विस्मयेऽपातयद्
मय्येवं सकृपो भवत्यपि तथा नित्यं प्रभुस्तिष्ठतु ।।'

प्रा० श्री० रामभाऊकापसे - प्रभृतीनामपि विद्यापीठसदस्यानां साहाय्यं मया लब्धमस्मिन् कर्मणि । एतत् पुस्तकं १३ नोव्हेंबर १९६५ दिनांके प्रकाशितं 'निर्णयसागरेण' अधिगतं च मया अनुदानधनं पुण्यपुरीविद्यापीठात यथा प्रतिश्रुतम् ।

(शेषागामिन्यङ्के)

(कार्तिक २०२४ से आगे)

# देवतास्वरूपमीमांसा

मूललेखकः श्री अरविन्दः, अनु० श्री जगन्नाथो वेदालङ्कारः, अरविन्दाश्रमः, पाण्डिचेरी

## त्रयोदशोऽध्यायः

तदेवमग्निः परमदेवस्य विराड् देवस्य च रूपेण स्तूयते । "हे अग्ने ! यदा त्वम् जायसे तदा वरुणो भवसि, पूर्णतया प्रदीप्तः संस्त्वम् मित्रो भवसि, हे **शक्तिपुत्र** ! त्वयि सर्वेऽपि देवा विद्यन्ते, हविष्प्रदात्रे मर्त्याय त्वम् इन्द्रो भवसि ।१ यदा त्वं **कन्यानां** गुह्यं नाम धारयसि तदा **त्वमर्यमा** भवसि । यदा त्वं **गृहपति** तत्पत्नीञ्च ( दम्पती ) समनसौ करोषि तदा तौ त्वां सुधृतं मित्रमिव प्रभाभिः (गोभिः) विभासयतः ।२ तव महिम्ने, हे रुद्र, मरुतस्तव चारु चित्रविचित्रञ्च जन्म स्वप्रबलवेगेन विद्योतयन्ति । विष्णोः परमपदेन त्वं **गवां ( गोनाम् )** गुह्यं नाम रक्षसि ।३ तव महिम्ना, हे देव, देवताः यथार्थदर्शनं विन्दन्ति, (बृहदभिव्यक्तेः) सम्पूर्णबाहुल्यमात्मनि धारयमाणाश्च ता अमृतमास्वादन्ते । यदा मनुष्या (अमृतत्व) काममयमानाः सत्ताया आत्माभिव्यक्ति (देवेभ्यः) विभजन्ति तदा ते आत्मनि यज्ञस्य होतृत्वेन **अग्निं** स्थापयन्ति. . . . . ।४ ज्ञानवांस्त्व **पितरमुद्धर** ( पापमन्धकारञ्च ) दूरीकुरु, हे **शक्तिपुत्र** ! योऽस्मासु तव पुत्रत्वेन ध्रियते तं स्वपितर**मुद्धर**" (५.३ ९) ।१ इन्द्रोऽपि ऋषिणा वामदेवेन इत्थमेव स्तुतः, नवमण्डलस्यास्मिन् त्र्यशीतितमे सूक्ते च कतिपयान्यसूक्तेष्विव सोमोऽपि स्वविशेषव्यापारैः सर्वोच्चदेवत्वेन प्रकटीभवति ।

सोम आनन्दरसस्य, अमृतरसस्याधिपति. । अग्निरिव सोऽपि उद्भित्सु ओषधिषु अप्सु च प्राप्यते । बाह्ययज्ञे प्रयुज्यमान. सोमोऽस्यैवानन्दरसस्य प्रतीकम् । अय पेषणोपलेन (**अद्रिणा, ग्राव्णा**) निष्पीड्यते । अस्य ग्राव्णश्च इन्द्रस्य वज्रेण सह, अर्थात् तया मूर्त्तविद्युच्छक्तया सह घनिष्ठः प्रतीकात्मकसम्बन्धो वर्तते या 'अद्रि' नाम्नाऽप्यभिधीयते । यदा वैदिकसूक्तानि इन्द्रदेवताया वज्रस्य प्रकाशं शब्दञ्च वर्णयन्ति तदा तानि अस्यैव ग्राव्णः प्रकाशमयगर्जनानि वर्णयन्तो भवन्ति । सत्तानन्दरूपेण सकृदभिषुतः सोमश्चालन्या (पवित्रेण) परिशोधनीयो भवति, चालनी मध्याच्चासौ स्वपरिशुद्ध-रूपेण रसस्य चम्वां स्रवति यस्यां स यज्ञे आनीयते यद्वाऽसाविन्द्रस्य पानार्थं कलशेषु स्थाप्यते । अथवा क्वचित्क्वचिच्चम्वा. कलशस्य वा प्रतीकमुपेक्ष्यते, सोमश्च केवलमेवं वर्ण्यते यत् स आनन्दस्य धारारूपेण देवानां धाम, अमृतस्य सदनं प्रति प्रवहति । इमानि वर्णनानि प्रतीकात्मकानीति नवममण्डलस्य

१. त्वमग्ने वरुणो जायसे यत्त्वं मित्रो भवसि यत् समिद्धः । त्वे विश्वे सहसस्पुत्र देवास्त्वमिन्द्रो दाशुषे मर्त्याय ॥ ऋ० ५.३.१ ।

२. त्वमर्यमा भवसि यत्कनीनां नाम स्वधावन् गुह्यं बिभर्षि । अञ्जन्ति मित्रं सुधितं न गोभिर्यद्दम्पती समनसा कृणोषि ॥ ५.३.२

३. तव श्रिये मरुतो मर्जयन्त रुद्र यत्ते जनिम चारु चित्रम् । पदं यद्विष्णो रूपं निधायि तेन पासि गुह्यं नाम गोनाम् ॥ ऋ० ५.३.३

४. तव श्रिया सुदृशो देव देवाः पुरू दधाना अमृतं सपन्त । होतारमग्निं मनुषो निषेदुर्दशस्यन्त उशिजः शंसमायोः ॥ ऋ० ५.३.४

१. अव स्पृधि पितरं योधि विद्वान् पुत्रो यस्ते सहसः सून ऊहे. . . .॥ ५.३.९

भूयस्सु सूक्तेषु सुतरां स्पष्टीभवति, यानि खलु सर्वाण्यपि सोमदेवता स्तुतिपराणि। तद्यथा, मानवस्य भौतिकदेहोऽत्र सोमरसस्य कलशत्वेन निरूपितो रूपकभाषया, यया चालन्या च स परिपूयते सा द्युलोकस्य पृष्ठे, **दिवस्पदे** आतता इत्येवमुपवर्णिता।

सूक्तमिदमेकस्मात् रूपकात् प्रारभ्यते यत् सोमरसस्य परिशोधन कलशे परिपूरणञ्चेति स्थूलव्यापारौ सूक्ष्मतयाऽनुसरति **दिवस्पृष्ठे** वितत पवित्रं (चालनी) परिशोधकमुपकरण वा ज्ञानोदीप्तं मनः (**चेत**) प्रतिभाति, मनुष्यस्य भौतिकदेहश्च कलशः। **पवित्र ते विततं ब्रह्मणस्पते**, चालनी त्वदर्थं विततास्ते, हे आत्मनोऽधिपते। **प्रभुर्गात्राणि पर्येषि विश्वत**; अभिव्यक्तीभवँस्त्वम् अङ्गेषु व्याप्तो भवसि, तान्यभितः सञ्चरसि वा सर्वत्र। सोमोऽत्र 'ब्रह्मणस्पति.' इति पदेन सम्बोधितः, इद पदं क्वचिदन्यदेवेभ्योऽपि प्रयुज्यते, किन्तु सामान्यतया सर्जनकारि **वाचोऽधिपतये** बृहस्पतय एव नियतम् ब्रह्मनाम देवे स आत्मा तदात्मचैतन्यं वा यद् वस्तूनां गुह्यहृदयादाविर्भवति, किन्तु प्रायस्तराम् इदमन्त.प्रेरितो रचनाकारको गुह्यसत्यपरिपूर्णश्चासौ विचारो यस्तस्माच्चैतन्यात् समुद्भूय मनसो विचारः, **मन्म**, सञ्जायते। तथाप्यत्रास्याभिप्रायः आत्मा इत्येव प्रतिभाति। आनन्दाधिप. सोमो ननु स सत्यः स्रष्टा योऽस्मदात्मानं धारयति, तस्याभ्यन्तराच्च दिव्यरचनामाविर्भावयति। तस्मै मनो हृदयञ्च ज्ञानदीपिते सती परिशोधकोपकरत्वेन परिणमिते स्तः। तयोश्चैतन्यं समस्तद्वन्द्व द्वैधसूत्रताभ्यो विमोचितं सद् व्यापकतया विशालीकृतम् येन तद् इन्द्रियजीवनस्य मानसजीवनस्य च पूर्णप्रवाह प्राप्य त वास्तविकसत्ताया विशुद्धानन्दे, दिव्येऽमरानन्दे परिणमयितु प्रभवेत्।

इत्थ प्राप्त., निस्यन्दितः परिशोधितश्च जीवनस्य सोमरस आनन्दे परिणतः सन् मानवशरीरस्य सकलाङ्गेषु मधुकलशेष्विव प्रस्रवन्नुपैति, तेषां सर्वेषाञ्च गर्भे पूर्णरूपेण, तेषां प्रत्येकमपि भागे प्रवहति। यथा कस्यचिन्मनुष्यस्य शरीर तीव्रमदिरायाः स्पर्शेन मदेन च परिपूर्णं भवति तथैव सकलमपि भौतिकशरीरमस्य दिव्यानन्दस्य सस्पर्शेन मदेन च परिपूर्यते। प्रभुर्विभुश्चेति शब्दौ हि वेदे न खलु "स्वामी" इति उत्तरकालिकेऽर्थे प्रयुक्तौ, किन्तु परवर्तिभाषाया **प्रचेताः विचेताश्च** यद्वा **प्रज्ञान विज्ञानञ्चेति** शब्दाविव नियताध्यात्मिकार्थे। "विभु" रर्थाद् विभवनं, व्यापकरूपेण भवनमस्तित्वधारणं वा, "प्रभु" रर्थात् प्रभवनं, चेतनायाः सम्मुखभागे विन्दुविशेषे च कस्यापि विशिष्टस्य वस्तुनोऽनुभवस्य वा रूपेण भवनमस्तित्वधारणं वा। सोमरसो मद्यमिव चालनीमध्याद् विन्दुशः क्षरति, ततश्च कलशे व्याप्तो भवति, अयं प्रभुः अर्थात् कस्मिँश्चिद् बिन्दुविशेषे केन्द्रिताया चेतनायामुद्भवति, अथवाऽय **विभुः** अर्थात् कश्चिदनुभवविशेष इव उद्भवति, ततश्चानन्दरूपेण सम्पूर्णसत्तां व्याप्नोति।

किन्तु न खलु प्रत्येकं मानवदेह. तस्य दिव्यानन्दस्य प्रबल प्रायशः प्रचण्डञ्च मदं प्रहितुं, धर्तुमुपभोक्तुञ्च समर्थो भवति। **अतप्ततनूर्न तदामो अश्नुते**, यो हि आमः, यस्य तनुश्च न तप्ता स तमास्वादितुमुपभोक्तुं वा न **प्रभवति**। **शृतास इद् वहन्तः तत् समाशत**, येऽग्नौ पक्वतां नीतास्त एव तं धारयन्ति पूर्णतयाऽऽस्वादयन्ति

च। देहे प्रस्नावितो दिव्य**जीवन**रसः तीव्रः, प्रचण्ड परिवर्हंश्चानन्द एव; यो देहो जीवनस्य चरमाग्निज्वालानां कष्टानामनुभवानाञ्च दृढ़तया सहनेनास्य रसस्य धारणार्थं न सज्जीभूतस्तस्मिन्नयं धर्त्तुं न शक्य.। यो मृण्मय आमघटः कन्दोरग्नौ पाकेन दृढतां नापादित. स सोमरस धारयितु न समर्थः, स भन्यते बहुमूल्यरसञ्च विकिरति। एवमेवानन्दस्येमम् तीव्ररसं पातुकामस्य मानवस्य भौतिकदेहो जीवनस्य सकलोत्पीडकाग्निज्वालाना सहनेन जयनेन च सोमस्य रहस्यमयाग्नेयतापाना सहनार्थं सिद्ध· स्यादित्यपरिहार्यम्, अन्यथा तस्य सचेतनसत्ता तं धर्तुं न शक्ष्यति। तमास्वादयन्त्येव सा। तदास्वादनादपि प्रागेव वा तं विकीर्णं विनष्टं च करिष्यति अथवा तत्स्पर्शेन मानसिकतया भौतिकतया च विचूर्णिता भविष्यति। (प्रथमो मन्त्र·)

अयं तीव्र आग्नेयश्च रसः परिशोधनमपेक्षते, अस्य परिपावनी चालनी चेममात्मनि ग्रहीतुं दिवस्पृष्ठे विशालतया वितता वर्तते, **तपोष्पवित्रं विततं दिवस्पदे**; अस्याः सूत्राणि तन्तवो वा सकलाअपि पवित्रप्रकाशनिर्मिता· रश्मिवल्लम्बमानाश्च, **शोचन्तो अस्य तन्तवो व्यस्थिरन्**। एततन्तुमध्याद् रसेन प्रवहता निःसरणीयम्। रूपकमिद स्पष्टतयैव विशुद्धं मानसिकं भाविकञ्च चैतन्य, सचेतनं हृदयं, **चेत**ः सङ्केतयति। तस्य विचारा भावावेशाश्चैव तस्य सूत्राणि तन्तवो वा। द्यौस्तावद् विशुद्धमानसतत्त्वं यत् नाडीजालस्य (**प्राणस्य**) देहस्य च प्रतिक्रियाणां वशगं न भवति। **दिवः** अर्थात् प्राणमयान्नमयचैतन्याद् भिन्नाया विशुद्धमनोमयसत्ताया. पृष्ठे विचारा भावावेगाश्च यथार्थबोधस्य सुखमय-चैत्यस्पन्दनस्य च पवित्ररश्मय सञ्जायन्ते, ता क्षुब्धाः तमसावृताश्च भाविकमानसिकैन्द्रियिकप्रतिक्रियास्ते परिहरन्ति या सम्प्रति वयं कुर्म। तत पर तेऽनुभवस्याघाताना कष्टाद् बाहुल्याच्चात्मरक्षणे निरता क्षुद्रचञ्चलवृत्तयो नावतिष्ठन्ते किन्तु स्वतन्त्राः, सबलाः सुभास्वराश्च सन्त पुर. स्फुरन्ति, सानन्द विस्तृताश्च तिष्ठन्ति येन ते विराट् सत्ताया. समस्तसम्भाव्यस्पर्शान् ग्रहीतुं दिव्यानन्दे परिणमयितुञ्च पारयेयुः। अतः सोमस्य परिशोधिनी चालनी रसस्य ग्रहणार्थं द्युलोकस्य पृष्ठे, **दिवस्पदे** एव विततेत्युक्तम्।

इत्थ गृहीताः परिशोधिताश्चेमे **तीव्राः** प्रचण्डाश्च रसाः, सोमरसस्येमाः सवेगा मादकशक्तय. सम्प्रति मनः क्षुब्धं न कुर्वन्ति। नापि शरीरमाहतं न विकीर्यन्ते न वा व्यर्थतां यान्ति। प्रत्युत स्वपरिपावकस्य मनः शरीरञ्च प्रीणयन्ति वर्धयन्ति च, **अवन्ति; अवन्त्यस्य पवीतारमाशवः**। एवं तस्य भाविक-मानसिक-भौतिकैन्द्रियिकसत्ताया. समग्रानन्दे तं वर्द्धयन्तस्ते रसास्तमादाय परिपूतानन्दमयहृदयमार्गेण दिवः सर्वोच्च स्तर पृष्ठ प्रति वाऽऽरोहन्ति, अर्थात् **स्वराश्यं** तं ज्योतिर्मयलोकमारोहन्ति यत्रान्तर्ज्ञानान्त. प्रेरणा-**स्वतः** प्रकाशज्ञानानां ग्रहणे समर्थं मनः **ऋतस्य** प्रभासु स्नातं बृहतोऽनन्ततया मुक्तञ्च सञ्जायते, **दिवस्पृष्ठमधितिष्ठन्ति** चेतसा। (द्वितीयो मन्त्रः)

—क्रमशः

—o—

# पाणिनेराचार्यस्य शब्दनित्यत्ववादः

[ लेखकः—श्री जयदत्तः शास्त्री व्याकरणदर्शनाचार्यः, वेदवेदांगमहाविद्यालयः, जोशीमठः ]

अशेषशेमुषीसम्पद्वतस्तत्र भगवत. पाणिनेराचार्यस्य लोकविश्रुता सुकृतिमष्टाध्यायीं कस्को न जानाति ? शलातुराभिजनेन दाक्षीपुत्रेण तन महर्षिणा देववाण्याः संस्कृतापरनामधेयायाः सुमहान् शब्दराशिः व्याकरणशास्त्रप्रणयनेन यथा व्यवस्थापितस्तथा नान्येन केनचिद् वैयाकरणान्तरेण । यद्यपि तत्पूर्व तदुत्तरकालञ्च बहव आचार्या व्याकरणशास्त्रग्रन्थान् प्राणैषुः शिष्यांश्चाध्यापयामासुस्तथापि स्वीयाष्टाध्यायीप्रभृतिग्रन्थेषु पाणिनिर्मुनिर्येन प्रकारेण उत्सर्गापवादादिलक्षणान्याश्रित्य कोटिशः शब्दान् व्युत्पादयामास तन्नूनमपूर्वमेव । एतस्य पुनरतिमहत. शब्दौघस्य प्रकृतिप्रत्ययादिविभागद्वारा व्युत्पत्ति प्रदर्शयताऽऽचार्येण न केवल धर्मजनकत्वधिया शब्दाना साधुत्वमन्वाख्यातम्, अपितु तषां समेषा नित्यत्वञ्च प्रतिपादितम् । तदत्र नित्यत्वपक्षमवलम्ब्य किञ्चिद् विचार्यते । तत्तूपरिष्टाल्लक्षणप्रमाणैरुपपादयिष्यामः । पूर्वं पूर्वपक्षमिहोपस्थापयामः ।

ननु शब्दनित्यत्वाङ्गीकारे पाणिनिनाऽनित्यानां ग्रामनगरादीनाम् ऐतिहासिकपुरुषाणाञ्च नाम्ना व्युत्पादनं कथङ्कार सङ्गच्छते ? "एङ प्राचा देशे" ( अष्टाध्यायी १-१-७५ )—एणीपचनीयः, भोजकटीय, गोनर्दीयः । "उदक् च विपाश. (अ०४-२-७४) दत्तेन निर्वृत्तः कूपो दात्तः । गुप्तेन निर्वृत्तो गौप्तः । "पानं देशे" (८-४-९) क्षीरं पानं येषां ते क्षीरपाणा उशीनराः । सुरापाणाः प्राच्याः । सौवीरपाणा बाह्लीका. । कषायपाणा गन्धाराः ।" द्रोणपर्वतजीवन्तादन्यतरस्याम्" (४-१-१०३) द्रौणायनः, द्रौणि. । पार्वतायनः, पार्वति. । जैवन्तायनः, जैवन्तिः । "गर्गादिभ्यो यञ्" (४-१-१०५) गार्ग्यः वात्स्यः ।"ऋष्यन्धकवृष्णिकुरुभ्यश्च" (४-१-११४) वाशिष्ठ., वैश्वामित्र. । श्वाफल्क., रान्धसः । वासुदेवः, आनिरुद्धः । नाकुल., साहदेवः । इत्यादय. सूत्रव्युत्पादिता. शब्दा देशविशेषाणां मनुष्यविशेषाणाञ्च बोधका इति कृत्वा नतरा नित्या भवितुमर्हन्ति । किं तर्हि ? अनित्या इति ।

तत्र । नह्येते शब्दा, देशविशेषाणां मनुष्यविशेषाणाञ्च नामानि सन्तीत्येतावन्मात्रेण अनित्यत्वभाजो भवितुमर्हन्ति । अत्र त्विद रहस्यं बोध्य यत् सर्वे शब्दा. परमार्थतो नित्यार्थानां वाचका. सन्ति सृष्टिप्रवाहस्य नित्यत्वात् । यथा दिनस्यानन्तरं रात्रिः, रात्रेरनन्तरं दिनं, तदनन्तर च रात्रिः, पुनर्दिनमिति दिनरात्र्योरिदानीन्तनो नित्य. प्रवाहो वर्तते । तद्वत् सर्गानन्तरं प्रलयः, तदनन्तर सर्ग, ततश्च प्रलयः, पुनस्ततः सर्गः—इति सृष्टिप्रलयावपि प्रवाहतो नित्यौ स्त. । तत्र प्रतिसर्गं मनुष्यादिजातीनामाविर्भावः प्रलये च तिरोभाव.१ । तत्र सृष्टिकाले तेषा तैरेव शब्दैर्व्यवहारो भवति यैः पूर्वसर्गेष्वभूद् अग्रिमेषु च भविष्यति । सर्गादौ हि साक्षात्कृतधर्मणामृषीणा प्रादुर्भावेन सह समस्ताना (वैदिकलौकिकानाम्) शब्दाना प्रयोगोऽपि तेषा पारस्परिकव्यवहारेण समजनि । महर्षय. खलु य य शब्दं यत्र यत्रार्थे प्रायुञ्जन्त स स शब्दस्तत्र तत्रैव प्रसिद्धोऽभूत् । कालान्तरे त एव शब्दा यौगिकयोगरूढिरूढ्यभिधान् त्रिविधान् भेदान् संभेजिरे । तेषु केषाञ्चिदर्थान्तरेष्वपि प्रयोगः शब्दस्य स्ववाच्यार्थं मुख्यं न खलु परित्यक्तुं पारयति । यथाऽद्यत्वेऽपि दरीदृश्यते—कस्यचिन्मनुष्यस्य

१ सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।
दिवं च पृथिवीं चान्तरिक्षमथो स्वः ॥
(ऋग्वेदः १०—१९०—३) इतिश्रुतेः · · (२)

नाम "सूर्यः" इति प्रसिद्धम् । एष शब्दस्तदाह्वानादौ तमेव जनं प्रत्याययति, परमन्यत्र सूर्यपदार्थम् ( ज्योतिष्पिण्डम् ) अभिधातु नैव खलु बाधते । "रूढिर्योगाद् बलीयसी" ति न्यायेन उभयोर्युगपत् प्रयोगे रूढ्यर्थो हि शब्दश्रवणानन्तरं झटिति ज्ञातार्थको भवतीत्यन्यदेतत् । एवमत्रापि य एतानि ग्राममनुष्यादिनामानि एणीपचन-गोनर्द-दत्त-गुप्त-वशिष्ठ-वसुदेव-नकुलादीनि पाणिनितन्त्रप्रसिद्धानि तानि नित्यार्थवाचकानि मन्तव्यानि । अर्थसादृश्यादिना अध्यारोपेण वाऽनित्यार्थेष्वपि ते शब्दा लौकिकैः प्रयुज्यन्ते इत्यतोऽनित्या इव प्रतीयन्ते परमनेन तेषां नित्यत्वं नैव विहन्यते । अथवा यथोक्तं पुरस्तात् सृष्टिप्रवाहस्य नित्यत्वात् सर्वेषां सत्यार्थानां सत्ताऽपि नित्याऽतस्तदर्थवाचकाः शब्दा अपि नित्या एव ।

अत्र प्रमाणम् । काशिकावृत्तिकृदाचार्यो जयादित्य आह–द्रौणायनः द्रौणि ।····नैवात्र महाभारतद्रोणो गृह्यते किं तर्ह्यर्णवादिः । तत इदं गोत्रे प्रत्ययविधानम् । इदानीं श्रुतिसामान्यादध्यारोपेण तथाऽभिधानं भवति ।" (काशिका१ ४-१-१०३)। सोऽन्यत्राप्याह–"····कथं पुनर्नित्यानां शब्दानामन्धकादिवंशसमाश्रयणेनान्वाख्यानं युज्यते ? केचिदाहुः कथमपि काकतालीयन्यायेन कुर्वादिवंशेष्वसंकरेणैव नकुलसहदेवादयः शब्दाः सुबहवः संकलितास्तानुपादाय पाणिनिना स्मृतिरुपनिबद्धेति। अथवाऽन्धकवृष्णिकुरुवंशा अपि नित्या एव, तेषु ये शब्दाः प्रयुज्यन्ते नकुलसहदेवादयस्तत्रेदं प्रत्ययविधानमित्यदोषः ।" ( काशिका२ ४-१-११४ )

श्रीमद्दयानन्दसरस्वतीस्वाम्युक्तिः—"यहां संशय होता है । शब्द तो नित्य हैं फिर अन्धक आदि वंशों के आश्रय से इनका व्याख्यान कैसे बन सकता है क्योंकि वंश तो अनित्य हैं । (उत्तर) प्रवाह रूप से कल्प कल्पान्त सृष्टि भी नित्य है और अन्धक आदि अधिकारी शब्द हैं कि इस प्रकार के कुल का नाम अन्धक होना चाहिये । सो अन्धक आदि वंश प्रतिकल्प में अनादि चले आते हैं । इस प्रकार इन अन्धक आदि शब्दों का वंशों के साथ अनादि सम्बन्ध बना हुआ है, कभी नवीन नहीं हुआ३ ।"

शब्दार्थसम्बन्धनित्यतामुपोद्बलयन् कैयटाचार्योऽप्याह—तत्र नित्यः शब्दो जातिस्फोटलक्षणो व्यक्तिस्फोटलक्षणो वा । कार्यशब्दिकानामपि मते प्रवाहनित्यतया । अर्थस्यापि जातिलक्षणस्य नित्यत्वम् । द्रव्यपक्षेऽपि सर्वशब्दानामसत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं वाच्यमिति नित्यता प्रवाहनित्यतया वा । सम्बन्धस्यापि व्यवहारपरम्परयाऽनादित्वान्नित्यता।' ( महाभाष्यपस्पशाह्निके 'सिद्धे शब्दार्थसम्बन्धे' वार्त्तिकस्य टीकायाम् ) ।

ननु सूत्रकारः पाणिनिः शब्दनित्यत्वसम्बन्धे न किञ्चिद् असूसुत्रत्, तद्वचनाभावे कथमन्येषां वचनप्रामाण्यमिति चेत् ? उच्यते बाढं नोक्तवानाचार्यो महता कण्ठेन "नित्याः शब्दाः" इति । परं "समर्थः पदविधिः" (२-१-१), "समर्थानां प्रथमाद्वा" ( ४-१-८२ ) इत्यादिसूत्रै विज्ञापयामास सर्वेषां शब्दानां ( = देववाचाम्) नित्यसत्त्वम् । किञ्च, पाणिनिमतं स्मृतवद्भिरौत्तरकालिकैराचार्यैः कात्यायनपतञ्जलिप्रभृतिभिः स्पष्टं निगदितं यत् शब्दार्थसम्बन्धनित्यत्वं पुरस्कृत्यैव प्रवृत्तः पाणिनिराचार्यो व्याकरणशास्त्रप्रणनाय । तद्यथा–

"कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम् ? "सिद्धे शब्दार्थसम्बन्धे–" सिद्धे शब्देऽर्थे सम्बन्धे चेति । अथ सिद्धशब्दस्य कः पदार्थः ?

१–द्रोणपर्वतजीवन्तादन्यतरस्याम् ।

२–ऋष्यन्धकवृष्णिकुरुभ्यश्च ।

३–वेदाङ्ग प्रकाशस्य स्त्रैणतद्धितभागे ऋष्यन्धक सूत्रोपरि व्याख्यानम् ।

नित्यपर्यायवाची सिद्धशब्दः ।····किं पुनरनेन वर्ण्येन ? किं न महता कण्ठेन नित्यशब्द एवोपात्तः? माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते । मङ्गलादीनि हि शास्त्राणि प्रथन्ते, वीरपुरुषाणि च भवन्ति, आयुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति ।·· अथ कं पुनः पदार्थं मत्वा एष विग्रहः क्रियते सिद्धे शब्देऽर्थे सम्बद्धे चेति ? आकृतिमित्याह । कुत एतत् ? आकृतिर्हि नित्या द्रव्यमनित्यम् । अथ द्रव्ये पदार्थे कथं विग्रहः कर्तव्यः ? सिद्धे शब्दे अर्थसम्बन्धे चेति । नित्यो ह्यर्थवतामर्थैरभिसम्बन्धः। अथवा द्रव्य एव पदार्थे एष विग्रहो न्याय्यः—सिद्धे शब्दे अर्थे सम्बन्धे चेति । द्रव्यं हि नित्यमाकृतिरनित्या ।····अथवा नेदमेव नित्यलक्षणं—ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृद्ध्यव्यययोगि यत्तन्नित्यमिति । तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते । किं पुनस्तत्त्वम् ? तस्य भावस्तत्त्वम् आकृतावपि तत्त्वं न विहन्यते । ···कथं पुनर्ज्ञायते-सिद्धः शब्दोऽर्थः सम्बन्धश्चेति? "लोकतः" । यल्लोकेऽर्थमर्थमुपादाय शब्दान् प्रयुञ्जते, नैषां निर्वृत्तौ यत्नं कुर्वन्ति । ये पुनः कार्या भावा निर्वृत्तौ तावत्तेषां यत्नः क्रियते । तद्यथा घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्वाह—कुरु घटं कार्यमनेन करिष्यामीति । न तद्वच्छब्दान् प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाह कुरु शब्दान् प्रयोक्ष्ये इति । तावत्येवार्थानुपादाय शब्दान् प्रयुञ्जते । यदि तर्हि लोक एषु प्रमाणं किं शास्त्रेण क्रियते ? "लोकतोऽर्थप्रयुक्ते शास्त्रेण धर्मनियमः" (क्रियते इति शेषः) ।···समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते-शब्देनैवार्थोऽभिधेयो नापशब्देनेति । एवं क्रियमाणमभ्युदयकारि भवतीति ।" (महाभाष्ये पस्पशाह्निकम्)। निगदस्पष्टमेतन्नापेक्षते व्याख्याम्। एतावता सुतरां सिद्धं यत् पाणिनेराचार्यस्य मतेन द्रव्यजातिपदार्थोभयपक्षेऽपि शब्दा नित्या सन्तीति ।

( शेषागामिन्यङ्के )

# गुरुवर्यपुण्यस्मरणम्

कवयिता—श्री धर्मदेवो विद्यामार्तण्डः

आनन्दकुटीरम्, ज्वालापुरम्

देवे श्रद्धाऽभवदविचला, यस्य वेदोक्तधर्मे,
श्रद्धा दिव्यामृतमविरतं, यः पपौ शुद्धचेताः ।
सर्वानार्यान्, विमलचरितान्, यो विधातुं प्रयेते,
श्रद्धानन्दो गुरुजनवरः, कस्य नाभ्यर्चनीयः ।।१

आसीच्छुद्धं विमलचरितं, यस्य सर्वानुकूल्यं,
यो निर्भीको व्यचरदखिले, लोक ओजस्विवर्यः ।
शिक्षां शुद्धां, निगमविहितां, सन्ददानः समेभ्यः,
श्रद्धानन्दो गुरुजनवरः, कस्य नाभ्यर्चनीयः ?।।२

येते कर्तुं, सकलमहसा, स्वीयदेशं स्वतन्त्रं,
कारागारे, प्रमुदितमनाः, कष्टजातं विषेहे ।
शिक्षासंस्थां, गुरुकुलमिति, स्थापयामास शुद्धां,
श्रद्धानन्दो गुरुजनवरः, कस्य नाभ्यर्चनीयः ।।३

यावन्न स्यात्, सकलभुवने, ब्रह्मचर्यप्रचारः,
तावन्न स्यात्, प्रगतिरुचिता, बोधयामास सर्वान् ।
सुप्तान् लोकान्,निगमविमुखान्, जागरूकांश्चकार,
श्रद्धानन्दो गुरुजनवरः, कस्य नाभ्यर्चनीयः ।।४

ऐक्यं कर्तुं, प्रणयजनितं, योऽनिशं संप्रयेते,
जामामस्जिद्, मुसलिमगृहे, यो ददौ भाषणानि ।
मुस्लिम्यूना, सपदि निहतो, योऽमरत्वं प्रपेदे,
श्रद्धानन्दो गुरुजनवरः, कस्य नाभ्यर्चनीयः ।।५

# सम्पादकीय टिप्पणयः

## भारतीयाया विघातकं विधेयकम्

राष्ट्रभाषाविषये यद् विधेयकं लोकसभायां प्रस्तुतं विद्यते तत् सर्वथाऽप्यनुचितमराष्ट्रिय भारतीयताया विघातकमिति मन्यामहे वयम्। अस्मन्मतेऽस्य प्रबलो विरोधो येनकेनाप्युपायेन कर्तु युज्यते। अहो! महदाश्चर्य शिववीरस्य प्रदेशे लब्धजन्मा चह्वाण आंग्लभाषाया प्रतिष्ठापनाय बद्धपरिकरो दुराग्रहग्रहिलश्च प्रतीयते। हिन्दीप्रदेशानां सर्वकारेषु तेषां कार्यव्यवहारेषु च आग्लभाषाया अनिवार्यता कुतो निर्धार्यते। किमाग्लभक्ताः शासनाधिरूढा औफिसरनाम्ना विख्याता कर्मचारिणो नेतारश्च नावधीरयन्ति जनतन्त्रसारम्? अस्ति कश्चिदन्योऽपि स्वतन्त्रो देशोऽस्मिन् भूतले यत्र विदेशीया भाषा राष्ट्रभाषात्वेन सभाजिताऽवलोक्यते। काम पठन्तु मद्रासप्रान्तवास्तव्या आग्लभाषां व्यवहरन्तु च यथेच्छम्, परमन्येषु कुतो बलवदारोप्यते सा।

राजनीत्याजिवावनभूप्रदेशे सर्वात्मना पतित पराजितश्च जयप्रकाशनारायणः सदैवोत्पथगामिनी निकृष्टा हीनवृत्ति प्रकटीकरोति। ततो भ्रष्टः सर्वोदयसमाजोपरि सम्पतितोऽतएव श्रीभावेऽपि तस्य परित्राणाय समागत.। धन्योऽसि महात्मगान्धि शिष्य! साधु सम्प्रदर्शिता महात्मनां पदवी विधेयकसम्पोषणेन त्वया।

आंग्लशासकानां समये या भारतमाताऽऽसीत्, पूर्वमेव सा खण्डशो विहीताऽऽग्लैः। बर्माप्रदेशः पृथक्भूतः, पाकिस्तानोऽपि पृथक् भूत्वा पलायितः। किमद्याप्यखण्डमवतिष्ठते भारतम्? यदि मद्रासप्रान्तः कश्चिदन्यो वा पृथक् बुभूषति कामं भवतु, काऽस्माकं हानिः। भारमातुर्यत्किञ्चित्रमतथ्यकल्पनाप्रसूतं प्रकाश्यते किं तदांग्लशासनात् पूर्वमासीत्? सुदूरेऽपि भूतकाले राजनीतिकदृष्ट्या न तत्तथाऽवलोक्यते।

मन्ये, देववाणीदृष्ट्या वैदिकधर्मदृष्ट्या वा तत् चित्रं कथङ्कारं तूलिकया निर्मातुं शक्यते परं न कोऽपि भाग्यशाली तां देववाणीं राष्ट्रभाषात्वेन प्रतिष्ठापयितुं प्रयतते। सर्वासामार्यभाषाणां जननीय देववाणी राष्ट्रभाषासिंहासनमधितिष्ठत्वेष एव प्रयत्नोऽस्माभिर्विधेयः। शौनःशेपाख्याने निगदितात् पितु. शासनलंघनात् यदि पञ्चाशत् विश्वामित्रपुत्रा द्रविडतां सम्प्राप्ताः किं ते आर्यस्रोतस सम्प्रसूता न? आर्यजातेः पृथक् सन्ति द्राविडा इत्याग्लानामुद्घोषः कूटनीतिपरायणानां छद्मवच। विदेशेऽधीता. विदेशीयसंस्कृतिछायायां बाल्यात् सम्प्रवर्धिताः संस्कृतभाषाज्ञानशून्या नेतारो यावदस्य देशस्य शासनधुरां वहन्ति तावद् भारतीयसंस्कृतेः संस्कृतस्य चाभ्युत्थानमसम्भवमेवेति निश्चप्रचमिव जोघुष्यतेऽस्माभि.। अस्मन्मते तु यदि स्वदेशभाषा विनष्टा तत् सर्वं विनष्टमिति मन्यामहे वयम्।

## स्वा० श्रद्धानन्दमहाभागानां बलिदानजयन्ती

प्रतिवर्षं दिसम्बरमासस्य २३ दिनांके श्रद्धाव्रतधारिणां श्रद्धानन्दमहाभागानां बलिदानजयन्ती सर्वत्र परमपावनपर्वरूपेण मान्यते। श्रुत्यनुसारं साधुवृत्तानुरूप च स्वजीवनं यापयन्तस्ते भारतीयसंस्कृतेराधारभूतायाः सर्वाङ्गपरिपूर्णाया देववाण्याः श्रुतीना च पुनरुद्धाराय गुरुकुलकागड़ीविश्वविद्यालयस्य स्थापना व्यदधुः। एवमन्यान्यपि बहूनि कार्यक्षेत्राणि तेषां संन्यासिप्रवराणां सन्ति। एवमेवाचार्यप्रवराणा रामदेवमहोदयानामपि दिसम्बरमासस्य ९ दिनांके १९३९ ईस्वीये निधनदिनं विद्यते। गुरुकुलकांगड़ीविश्वविद्यालयमभिलक्ष्य स्वामिश्रद्धानन्दानन्तरमेवाचार्यवर्याणां स्थानं विद्यते। अतोऽस्मिन् पर्वणि गुरुकुलवासिभिरार्यसामाजिकनेतृभिर्विचारणीयमेतत् यत् गुरुकुलं किं स्वस्थानान्न परिभ्रष्टम्, यत्किञ्चित् परिवर्तनमत्र संल्लक्ष्यते किं तदुचित्तमिति। वयं तेभ्यो गुरुकुलप्रासादस्याधारभूतेभ्यस्तपस्त्यागादिमूर्तिरूपेभ्यो वारं वारं प्रणोनुमः। सप्रश्रयं सश्रद्धं श्रद्धाञ्जलिं समर्पयामः।

# साहित्य समीक्षा

धर्मशिक्षा, हमारी कहानी, आर्यसमाज के १२ रत्न।

लेखक—श्री मित्रसेन आर्य, एम. ए.

'सन्ध्या गायन' ( ले० श्री विद्याधर आर्य )

प्रकाशक—भारतवर्षीय वैदिकसिद्धान्तपरिषद्, सेवासदन, कटरा अलीगढ़।

ये तीनों लघु पुस्तिकाएं श्री मित्रसेन जी आर्य द्वारा लिखित है। छोटे बच्चों को उद्देश्य करके लिखी गई है। आज के भारत के नौजवान अपने धर्म, सभ्यता व संस्कृति को भूलते जाते हैं। अतः आवश्यकता इस बात की है कि नव-सन्तति को भारतीय, सभ्य व सुसंस्कृत कैसे किया जाये ? हमारे विचार में उपर्युक्त पुस्तिकाएं इस उद्देश्य की पूर्ति मे सहायक हो सकती हैं। छोटे बच्चों को ये पुस्तके पढ़ने को देनी चाहियें।

इसी भांति 'सन्ध्या गायन' श्री विद्याधर आर्य द्वारा रचित है, जिसमें सन्ध्या-मन्त्रों का कविता में अर्थ दर्शाया गया है। यह सन्ध्या के मन्त्रों के अर्थों को बच्चों के मस्तिष्क में बैठाने के लिये उपयोगी साधन है।

भगवद्दत्त वेदालङ्कार

०—०

( पृष्ठ २८० का शेष )

महाविद्यालय के प्रार्थना भवन में अध्यक्ष, आर्ट्स कालिज श्री सुखदेव जी विद्यावाचस्पति की अध्यक्षता में अभिनन्दन-सभा आयोजित हुई।

वादविवाद प्रतियोगिता में श्री वेदप्रकाश एम० ए० संस्कृत द्वितीय वर्षसर्व प्रथम रहे। उन्हें प्रशस्ति पत्र के साथ-साथ स्वर्ण पदक एवं रजत पदक प्राप्त हुए। केवल इतना ही नहीं अपितु उनकी धाराप्रवाह संस्कृत को देख कर एक श्रोता एकादश रुपए पुरस्कारस्वरूप प्रदान किए।

निबन्ध प्रतियोगिता में श्री महावीर 'नीर' विद्यालंकार एम० ए० का स्थान सर्वप्रथम रहा। आपको पुरस्कारस्वरूप प्रशस्ति पत्र के साथ-साथ सौ रुपए प्रदान किए गए।

कुरुक्षेत्र विश्वविद्यालय में आयोजित अखिल भारतीय स्तर की भाषण प्रतियोगिता में 'महर्षि दयानन्द की देन' विषय को लेकर श्री रघुबीर 'मुमुक्षु' वेदालंकार अन्तिम वर्ष का द्वितीय स्थान रहा।

उपरोक्त तीनों छात्रों के अभिनन्दनार्थ आयोजित सभा में अनेक उपाध्यायों तथा छात्रों ने पुरस्कृत होने पर अपार प्रसन्नता अनुभव की। हम विश्वविद्यालय की ओर से उपरोक्त छात्रों का पुनः अभिनन्दन करते हुए बधाई देते हैं।

## स्वास्थ्य-मंत्री गुरुकुल में

२१ नवम्बर को उत्तरप्रदेश के स्वास्थ्यमंत्री श्री प्रतापसिंह जी गुरुकुल में पधारे। आपने गुरुकुल के समस्त विभागों को देखकर अपार प्रसन्नता अनुभव की। आपको विश्वविद्यालय की ओर से अभिनन्दन पत्र भेंट किया गया। आपसे आशा की गई कि आप इस संस्था को अपनी संस्था समझेंगे। स्वागतसभा में आयुर्वेद महाविद्यालय के छात्रों ने सरकार से मिलने वाले-अनुदान की ओर इंगित किया। मंत्री महोदय ने आश्वासन दिया कि इस पर मैं ध्यान दूंगा। विश्वविद्यालय मंत्री महोदय का अभिनन्दन करता है।

०—०

# विवाहसमये वधूवराभ्याम् आशिषः

**कवि. – विश्वनाथ केशव छत्रे द्वारा श्री० भावे, ५२ सॅंचरी रेग्रान 'डी' क्वार्टर्स**
**धोबी घाट, पो० शहाड ( ठाणें )**

आनन्देन वधूवरौ ! सहचरौ स्त्रायु पथे स्वेच्छया
सबद्धौ भवतो युवा सुमृदुलस्नेहस्य दाम्ना दृढम् ।
भूयाज्जीवनमुज्ज्वल सुखमय शातिप्रपूर्ण च वाम्
दत्त्वेत्याशिषमीशमगलनिधिः कुर्यात्सदा मंगलम् ॥

हे वधु और वर ! तुम दोनो अपने जीवन-पथ मे स्वेच्छा से आनन्दपूर्वक सहचर बने हो । तुम दोनो सुकोमल स्नेहरूपी रज्जु द्वारा विवाह-बन्धन मे दृढता मे बंध गये हो । तुम दोनो का जीवन उज्ज्वल, मुखमय तथा शान्ति से भरपूर हो । यह मङ्गलनिधि ईश आशीर्वाद द्वारा मदा तुम्हारा मंगल करता रहे ।

यास्यत्यादिम आश्रमोऽन्तमुभयोः स ब्रह्मचर्याभिध.
संगाद्यैक्यविवेकसख्यमधुना पाल्यो गृहस्थाश्रम ।
चक्रे यावदहो ! सम प्रचलनस्तावद्रथस्थ. सुखी
ज्ञात्वेत्याचरतो स्वकर्म भगवान्कुर्याद्द्वयोर्मंगलम् ॥

तुम दोनों का यह ब्रह्मचर्याश्रम अब समाप्त हो रहा है, अब तुम एक हो, इस विवेक के सहित मित्र बन गृहस्थाश्रम का पालन करना । रथ में जुते दो बैल जब तक एकसाथ समान गति से चलते हैं तब तक रथ में स्थित व्यक्ति सुखी रहता है, उसी प्रकार गृहस्थरूपी रथ मे तुम दोनों परस्पर सम्बद्ध हो यदि एक समानभाव से स्वकर्म का आचरण करने वाले बनोगे तो सुखी रहोगे । वह भगवान् तुम दोनों का सदा कल्याण करे ।

ध्येयं निश्चितमायुषस्तु सुचिरं संपाद्यतां यत्नतः
सन्मार्गेण धनं समर्ज्य विमलैः कृत्यैः क्षयं नीयताम् ।
यायाद्दिक्षु यथा कुलद्वययशः सैव क्रियाऽऽचर्यतां
प्रीत्यै यस्य शुचिक्रियाः स भगवान्कुर्याद्द्वयोर्मंगलम्॥

